संस्कृतवार्ताः

13/01/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· प्रधानमन्त्री नरेन्द्रमोदी अद्य देशं वातावरणज्ञानसज्जं राष्ट्रं कर्तुं मिशनमौसम इत्यस्य शुभारम्भं कृतवान्।

· प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रिय- हरिद्रा- संघस्य सुस्थापनामभिलक्ष्य उक्तं यत् सूचनेयं भारतस्य श्रमजीविभ्यः कृषकेभ्यः सुखकरा अस्तीति।

· विदेशमन्त्री डा. जयशंकरः स्पेनदेशे भारतीयप्रवासिनः सम्बोधयन् उक्तवान् यत भारतं सर्वदा आह्वानसमये विश्वस्य सहयकत्वेन स्थितं भवति।

· मकरसङ्क्रान्ति- पोंगल- बिहू- उत्तरायणादीनि पर्वाणि अद्य आराष्ट्रे सोत्साहं परिपाल्यमानानि सन्ति।

· खो खो विश्वचषकस्य उद्घाटनद्वन्द्वे भारतीयमहिलादलं दक्षिणकोरियादलं विरुध्य क्रीडिष्यति। तत्रैव पुरुषदलस्य स्पर्धा ब्राजीलदलेन समं भविष्यति।

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य देशं वातावरणसज्जं राष्ट्रं कर्तुं मिशनमौसम इत्यस्य शुभारम्भं कृतवान्। नवदिल्लीनगरस्य भरतमण्डपे भारतस्य वातावरणविभागस्य सार्धैकशततमस्य स्थापनादिवसस्य उत्सवस्य समये एतत् विमोचनं जातम्।

अस्मिन् अवसरे प्रधानमन्त्रिणा उक्तं यत् मिशनमौसम इति भारतस्य स्थायित्वं भविष्यते च सज्जं राष्ट्रं निर्मातुं प्रतिबद्धतायाः प्रमाणभूतम् अस्ति। श्रीमोदी भारतीय-ऋतु-विज्ञानविभागस्य सार्धैकशत-वर्षीययात्रायाः प्रशंसाम् अकरोत्, अयं कश्चन देशे आधुनिकविज्ञानस्य प्रौद्योगिक्याः च गौरवपूर्णः अध्यायः अस्ति  इति सः वर्णितवान्। सः प्रकाशितवान् यत् आईएमडी इति न केवलं कोटिशः भारतीयानां सेवां करोति अपितु भारतस्य वैज्ञानिक-प्रगतेः प्रतीकभूततवेन  अपि वर्तते |

प्रधानमन्त्रिणा श्रीमोदिना प्रकाशितं यत् 'सर्वस्य कृते पूर्वसंचेतना' इति उपक्रमः अधुना नवति प्रतिशताधिकां जनसंख्यां व्याप्नोति। सः अवदत् यत् कोऽपि गतदिनानां आगामिदशदिनानां च वातावरणसूचनाः कदापि प्राप्तुं शक्नोति। तेन प्रतिपादितं यत् यत् एतद्वारा वास्तविकसमये अद्यतनीकरणेन सुरक्षा वर्धते, कृषि-नील-अर्थव्यवस्थेत्यादीनां क्षेत्राणां सुदृढीकरणं च भवति। सः अवदत्, यत् प्राकृतिकविपदां प्रभावं न्यूनीकर्तुं ऋतुविज्ञानस्य कार्यक्षमता इतोपि वर्धितव्या।

भारतस्य ऋतुविज्ञानविभागस्य उन्नतिभिः तस्य आपदाप्रबन्धनक्षमता सुदृढा सञ्जाता अस्ति, यद्द्वारा सम्पूर्णविश्वस्य लाभः सञ्जायते। सः अवदत् यत् भारतस्य Flash Flood Guidance इति प्रणाली नेपाल-भूटान-बाङ्गलादेश-श्रीलङ्कादेशेभ्यः सूचनां प्रददाति। विश्वबन्धुरूपेण भारतं प्राकृतिकविपदां समये अन्यदेशानां साहाय्यार्थं सर्वदा प्रथमं तिष्ठति। विश्वसेवायां, सुरक्षायां च भारतं महत्त्वपूर्णां भूमिकां निर्वहति इति सः विश्वासं प्रकटितवान् ।

आयोजनं सम्बोधयन् केन्द्रीयपृथिवीविज्ञानराज्यमन्त्री डॉ. जितेन्द्रसिंहः भारतस्य वातावरणपूर्वसूचनाक्षमतायां महत्त्वपूर्णप्रगतेः उपरि बलं दत्तवान्। सः अवदत् यत् विगतदशके पूर्वानुमानेषु पञ्चाशत्प्रतिशतमितं परिष्कारः जातोस्ति ।

अस्मिन्नवसरे प्रधानमन्त्री IMD इत्यस्य सार्धैकशतीमहोत्सवस्य स्मारकमुद्रां विमोचितवान्। सः वातावरणस्य तन्यतायाः परिवर्तनस्य अनुकूलनस्य च कृते IMD Vision-2047 इति प्रतिवेदनम् अपि प्रकाशितवान् । अस्मिन् वातावरणपूर्वसूचना, वातावरणप्रबन्धनम्, वातावरणपरिवर्तननिवारणं च इत्येताः नैकाः योजनाः सन्ति ।

<u>प्रधानमन्त्री/ हरिद्रा-सङ्घः</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रिय- हरिद्रा- संघस्य सुस्थापनामभिलक्ष्य प्रसन्नता प्रकटिता। एकस्मिन् सामाजिक- प्रसार- सन्देशे तेनोक्तं यत् सूचनेयं भारतस्य श्रमजीविभ्यः कृषकेभ्यः सुखकरा अस्तीति।

## जयशङ्करः

विदेशमन्त्री डा.जयशंकरः स्पेनदेशे भारतीयप्रवासिनः सम्बोधयन् उक्तवान् यत् सः वैश्विकमञ्चे "सबका साथ, सबकाविकास , सबका विश्व" चेति भारतस्य दृष्टिकोणे बलं दत्तवान् ।

अद्यत्वे अत्यल्पाः एव देशाः सन्ति ये रूस-युक्रेन-योः सह अथवा इजरायल-इरान्-देशयोः सह वार्तालापं कर्तुं शक्नुवन्ति । प्रधानमन्त्री मोदी उभयम् अपि कर्तुं समर्थः अस्ति। तथैव अल्पाः एव देशाः एकत्रैव QUAD, BRICS इत्येतयोः सदस्याः भवितुम् अर्हन्ति इति। एतत् किञ्चित् अतीव अद्वितीयम् अस्ति। अद्यत्वे यदि जगत् पश्यन्ति तर्हि अतीव ध्रुवीकृतः संसारः अस्ति। एतादृशे परिदृश्ये भारतं सबका साथ, सबका विकास, सबकविश्व चेति ध्येयं जगति नेतुम् समर्थः देशः अस्ति।

डॉ. जयशङ्करः भारत-स्पेन-सम्बन्धयोः विषये अपि आशां प्रकटितवान् यत् द्वयोः राष्ट्रयोः मध्ये सम्बन्धाः महदुन्नताः भवितुं प्रवृत्ताः सन्ति।

## उत्सवस्य शुभकामनाः

मकरसङ्क्रान्ति- पोंगल- बिहू- उत्तरायणादीनि पर्वाणि अद्य आराष्ट्रं सोत्साहं परिपाल्यमानानि सन्ति। कृषिकर्मनिरतानां शस्योच्छेदनेन सह ऐक्यभावस्य अयं मकरसङ्क्रान्ति- उत्सवः गङ्गा-यमुनादिषु पवित्रनदीषु अवगाहनेन सह श्रद्धाभावपूर्वकं परिपाल्यते। तमिलनाडुराज्ये पोंगल-पर्वणः परिपालनमपि उत्साहस्य उन्नतमां स्थितिम् अभिस्पृशति। परिजनाः पारम्परिकाणि मिष्टान्नानि निर्मीय, मृण्मयानि पात्राणि आभूष्य भगवन्तं भास्करं पोंगलं समर्प्य स्वकीयां कार्तज्ञभावनां च प्रकटयन्ति। असमराज्ये च बिहू अथवा भोगालि बिहू अत्युत्साहेन परिपाल्यते। तत्रैव पाश्चिमभारतीयक्षेत्रेषु विशेषतो गुजरातराज्ये च उत्तरायण- पर्व समग्रं खंक्षेत्रं कर्गदादि निर्मितैः चित्रविचित्रैः पतङ्गैः आवृत्य परिपाल्यते । एतैः उत्सवैः सम्पूर्णे राष्ट्रे प्रकृतिं प्रति आभारभारभरितभावाः प्रकट्यन्ते। अवसरेऽस्मिन् राष्ट्रपतिना, उपराष्ट्रपतिना, प्रधानमन्त्रिणा च सर्वेभ्यः देशवासिभ्यः मकरसङ्क्रान्तेः, पोंगलस्य, बिहोः, उत्तरायणस्य च शुभकामनाः सन्ति प्रदत्ताः।

## महाकुम्भ- मकरसङ्क्रान्ति

सार्धत्रिकोटितोऽप्यधिक-जनैः अद्य मकरसङ्क्रान्त्यवसरे महाकुम्भे त्रिवेण्याम् अमृतस्नानं कृतम्। सर्वाः अपि परम्पराः समयक्प्रकारेण परिपाल्यमानाः सन्ति। कोटिशः श्रद्धालवः साधवश्च अमृतस्नानस्य पुण्यं समर्जयन्तस्सन्ति। पवित्र- अमृतस्नानानन्तरं श्रद्धालवः घट्टेषु अभ्यर्चनापुरस्सरं स्वकीयाः परम्पराः परिपालयन्तश्च सन्ति। सहैव बहवः जनाः अद्य प्रातःकालिकीं भगवत्याः गङ्गायाः महारार्तिक्यमपि प्रत्यक्षीकृतवन्तः। परम्परानुसारं जनाः संक्रान्त्यवसरे दान- पुण्यादिकानि कार्याणि अपि आचरितवन्तः। अवसरेऽस्मिन् प्रधानमन्त्रिणा नरेन्द्रमोदिना अमृतस्नानं कृतवद्भ्यः श्रद्धालुभ्यः वर्धापनपुरस्सरं प्रोक्तं यत् महाकुम्भोत्सवः आध्यात्मिकतायाः श्रद्धायाश्च स्पष्टं प्रतिबिम्बनं करोतीति।

## प्रधानमन्त्री/सशस्त्रसेनादिवसः

सशस्त्रसेनादिवसावसरे प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्रस्य प्राक्तनसैनिकान् प्रति आभारपूर्णभावाः प्रकटिताः। एकस्मिन् सामाजिक- प्रसार- तन्त्रजाले प्रसारिते सन्देशे प्रधानमन्त्रिणा वीरबलिं प्राप्तेभ्यः सैनिकेभ्यः श्रद्धासुमनानि समर्पितानि। तेन सैनिकानां बलिदान- शौर्याभ्यां सह राष्ट्ररक्षायै तेषां अकाट्यां प्रतिबद्धतां च सश्रद्धं स्वीकृतम्। तेनोक्तश्च यत् एते वीरभटाः राष्ट्र- नायकाः देशभक्ताश्च चिरस्थायिनः प्रतिनिधयः सन्तीन्ति। श्रीमोदिना स्वीकृतं यत् प्रशासनम् एतेषां कल्याणाय सर्वदैव अग्रे अस्ति, इतोप्यग्रेऽपि भविष्यति। केन्द्रीयमन्त्रिणा गडकरिणा नागपुरे वायुसेनानगरे नवमे पूर्वसशस्त्र- बल- दिवससमारोहे प्रातिभाग्यं कृतम्। तेनोक्तश्च यत् स्वकीये रक्षा- सेवा- कार्यकाले पूर्वसैनिकानां योगदानम् अविस्मरणीयमस्तीति।

## खोखोविश्वचषकप्रतियोगिता

अद्य सायं नवदिल्लीनगरस्य इन्दिरागान्धी इण्डोरक्रीडाङ्गणे खो खो विश्वचषकस्य उद्घाटनद्वन्द्वे भारतीयमहिलादलं दक्षिणकोरियादलं विरुध्य क्रीडिष्यति। प्रियंका इङ्गल् इत्यस्याः नेतृत्वे भारतीयदलस्य मुख्यम् उद्देश्यं विजयेन समं स्वाभियानस्य शुभारम्भो भवेत् इति भविष्यति। तदनन्तरं भारतीयपुरुषदलस्य ब्राजीलं विरुध्य स्पर्धा भविष्यति।

।। इति वार्ता:।।